2

कुलीना कथायां स्त्री अस्मितायाः अभिव्यक्तिः

The Expression of Female Identity in Kulīnā

Kulīnā-kathāyāṃ strī-asmitāyāḥ abhivyaktiḥ

डॉ टुम्पा जाना,
सहायिकाध्यापिका,
नाड़ाजोल राज कोलेज, पश्चिमबंग

शोधसारः- वीणापाणिपटन्याः ‘कुलीना’ बालविवाहः उपेक्षा पारिवारिकशोषणम् आत्मसम्मानः तथा मौनप्रतिरोधस्य विविधाः पक्षाः विश्लेषिताः सन्ति। सुरमा बहुविधक्लेशान् अनुभवन्ती अपि स्वशीलं धैर्यं कर्तव्यनिष्ठां च न परित्यजति। तस्याः मौनं दुर्बलतायाः न अपितु नैतिकबलस्य आत्मगौरवस्य च प्रतीकत्वेन प्रकाशते। लेखिकया कुलीनब्राह्मणसमाजस्य रूढीनां पितृसत्तात्मकव्यवस्थायाश्च सूक्ष्मालोचना कृता। अध्ययनस्य निष्कर्षे प्रतिपाद्यते यत् कुलीना कथायां स्त्री अस्मिता विद्रोहरूपेण न अपितु सहिष्णुता आत्मसम्मानः नैतिकदृढता तथा मानवीयमूल्यसंरक्षणरूपेण अभिव्यक्ता अस्ति। अतः एषा कथा आधुनिकसंस्कृतसाहित्ये स्त्रीविमर्शस्य महत्त्वपूर्णा प्रतिनिधिरचना इति स्वीकर्तुं शक्यते।

प्रमुखशब्दाः अस्मिता वीणापाणिपाटनी कुलीना आधुनिकसंस्कृतकथासाहित्यम् स्त्रीविमर्शः। आधुनिकसंस्कृतसाहित्ये कथासाहित्यक्षेत्रे विशिष्टस्थानमधितिष्ठन्ती वीणापाणिपाटनी समकालीनसंस्कृतसाहित्यस्य प्रमुखासु कथाकारासु अन्यतमा परिगण्यते। तस्याः रचनासु सामाजिकजीवनस्य यथार्थचित्रणं, विशेषतः नारीजीवनस्य विविधसमस्या, सामाजिकवैषम्यं, पारिवारिकसङ्घर्षः, आत्मसम्मानः, स्वावलम्बनम् तथा मानवीयमूल्यानां सशक्तं निरूपणं दृश्यते। आधुनिकसंस्कृतकथासाहित्ये नारीचेतनायाः सुदृढप्रतिष्ठापने तस्याः योगदानम् अत्यन्तं महत्त्वपूर्णम् अस्ति।तस्याः अपराजिता इति कथासङ्ग्रहः आधुनिकसंस्कृतकथासाहित्यस्य उल्लेखनीयेषु ग्रन्थेषु अन्यतमः। अस्मिन् सङ्ग्रहे अपराजिता, कुलीना, शङ्खनादः, अनुगृहीता, जागरितः, एकोऽन्यः शिविः तथा वातायनम् इति सप्त कथाः सङ्गृहीताः सन्ति। एतासु कथासु लेखिका नारीणां जीवनसंघर्षम्, सामाजिकबन्धनानि, पारिवारिकसमस्याः, स्वाभिमानबोधः, स्वातन्त्र्यलाभस्य प्रयत्नः तथा नैतिकमूल्यानां संरक्षणम् अत्यन्तं मार्मिकतया निरूपयति। तस्याः नारीपात्राणि केवलं पीडितानि न दृश्यन्ते, अपितु धैर्येण,

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

आत्मविश्वासेन, दृढसङ्कल्पेन च प्रतिकूलपरिस्थितीन् अतिक्रम्य स्वजीवनस्य नूतनं मार्गं निर्मातुं समर्थानि भवन्ति।

वीणापाणिपाटन्याः जन्म १९३२ ख्रीष्टाब्दे हलद्वाणीनगरे अभवत्। बाल्यकालादेव तस्याः पारिवारिकपरिवेशे संस्कृताध्ययनस्य विशेषः प्रचारः आसीत्, येन संस्कृतभाषायां तस्याः गाढानुरागः विकसितः। सा ईसाबेला थोबर्न महाविद्यालयात्, लखनऊतः उच्चशिक्षां प्राप्तवती। ततः परं लखनऊविश्वविद्यालयात् हरिवंशपुराण का साहित्यिक एवं सांस्कृतिक अध्ययन इति विषये पीएच डी उपाधिं प्राप्तवती। उपाधिप्राप्त्यनन्तरं सा लखनऊविश्वविद्यालयस्य संस्कृतविभागे अध्यापनकार्ये नियुक्ता अभवत्। पश्चात् १९६७ ख्रीष्टाब्दे दिल्लीविश्वविद्यालयस्य जानकीदेवीमहाविद्यालये अध्यापिकात्वेन कार्यभारम् अङ्गीकृतवती।

तस्याः प्रमुखे मौलिकग्रन्थे अपराजिता तथा मधुराम्लम् इति स्तः। एतदतिरिक्तं तस्याः अनेकाः शोधलेखाः विभिन्नपत्रपत्रिकासु प्रकाशिताः सन्ति। संस्कृतसाहित्यस्य विकासे तस्याः विशिष्टयोगदानस्य मान्यतास्वरूपं सा १९९६ ख्रीष्टाब्दे संस्कृतसाहित्यसेवा इति सम्मानेन सम्मानिता अभवत्। आधुनिकसंस्कृतकथासाहित्ये वीणापाणिपाटन्याः अवदानं निःसन्देहं चिरस्मरणीयं तथा प्रेरणाप्रदम् अस्ति।

बीनापाणिपाटन्याः कुलीना , तत्र प्रचलितानां सामाजिकरीतीनां तथा स्त्रीजीवनस्य मर्मस्पर्शिनं चित्रणं करोति। कथायाः नायिका सुरमा नाम युवती, या कुलीनब्राह्मणकुले जाता जीवानन्दस्य सह परिणीता भवति।कथायाः आरम्भे जीवानन्दस्य गृहे महेन्द्रस्य आगमनस्य समाचारः प्रसरति। महेन्द्रः उच्चराजकीयपदे प्रतिष्ठितः अधिकारी आसीत्। तस्य आगमनवार्तां श्रुत्वा सर्वे ग्रामवासिनः, बान्धवाः, सुहृदश्च तस्य स्वागताय समायाताः। जीवानन्दस्य परिवारः बहुकालं दारिद्र्येण पीडितः आसीत्। परिवारस्य अन्ये सदस्याः समुचितशिक्षायाः अवसरं न प्राप्तवन्तः। महेन्द्रस्य उन्नतिः समग्रपरिवारस्य गौरवकारणम् अभवत्।महेन्द्रः सपरिवारः स्वगृहं प्राप्य विमातरं प्रणमति। सा तस्य आरात्रिकं विधाय गृहाभ्यन्तरं नयति। तस्य पत्नी गृहस्य विविधप्रकोष्ठान् निरीक्ष्य विमातरं पृच्छति भवत्याः निवासस्थानं कुत्र अस्ति?" विमाता प्रथमं मौनमेव धारयति, पश्चात् स्वस्य प्रकोष्ठं दर्शयति। तस्मिन् कक्षे जीर्णानि मलिनानि च वस्त्राणि विकीर्णानि आसन्। तस्य दयनीयां स्थितिं दृष्ट्वा महेन्द्रपत्नी अत्यन्तं दुःखिता भवति।

अनन्तरं कथा भूतकालस्य घटनां वर्णयति। कूर्माचलपर्वतस्य उपत्यकायां स्थिते ग्रामे सुरमायाः विवाहः जीवानन्देन सह सम्पन्नः। विवाहसमये सुरमा द्वादशवर्षीया आसीत्, जीवानन्दश्च अष्टादशवर्षीयः। विवाहानन्तरमेव जीवानन्दः व्यापारकारणात् दुबईदेशं गतः। सुरमा पुनः स्वपितृगृहं प्रेषिता। तत्र सा विमात्रा सह निवसन्ती गृहकार्येषु निरता अभवत्।

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

बाल्यकालादेव सुरमा बहूनि दुःखानि अनुभूतवती। सा पितृस्नेहात् वञ्चिता आसीत् तथा विमातुः कठोरव्यवहारं नित्यं सोढवती। पर्वतीयप्रदेशे सा पशून् चारयति स्म, निर्झरेभ्यः जलम् आनयति स्म, गृहकार्याणि च करोति स्म। एवं श्रमेण सह तस्याः बाल्यं शनैः शनैः यौवने परिवर्तितम्। सरलस्वभावा, सहनशीला, विनयी च सुरमा अल्पेनापि सन्तुष्टा भवति स्म।

एकस्मिन् दिने पत्रवाहकः सुरमायाः पितृगृहं पत्रम् आनयत्। तस्मिन् पत्रे लिखितम् आसीत् यत् जीवानन्दः विदेशात् प्रत्यागतः अस्ति; अतः सुरमां शीघ्रं पतिगृहं प्रेषयितव्यम्। पत्रं पठित्वा सुरमा स्वभ्रात्रा सह पतिगृहं प्रति प्रस्थितवती। मार्गे गच्छन्ती सा स्वजीवनस्य विषये चिन्तयन्ती आसीत्। विवाहस्य अनन्तरं पञ्चवर्षाणि व्यतीतानि, तथापि पत्या सह तस्याः सहवासः न जातः। अतः भविष्यत् जीवनं कथं भविष्यतीति चिन्तया तस्याः मनः व्याकुलम् अभवत्।

पतिगृहं प्राप्य सुरमा श्रान्ता आसीत्। तस्मिन्नेव समये जीवानन्दः तां दृष्ट्वा अल्पं सम्भाषणं कृत्वा अवदत् यत् विदेशे निवसन्त्या नूतनजीवनस्य अनुकूलनम् आवश्यकम्। तदनन्तरं यात्रायाः सर्वाणि आयोजनानि सम्पन्नानि। कुलपुरोहितेन स्वस्तिवाचनं कृतम्, श्वश्रूः मंगलदीपं प्रज्वालयामास। सर्वेषां आशीर्वादान् गृहीत्वा सुरमा जीवानन्देन सह नूतनजीवनस्य दिशि प्रस्थितवती।

नियतसमये सुरमा जीवानन्देन सह विदेशस्थितं निवासस्थानं प्राप्नोति। तत्र प्रविश्य सा एकां युवतीं महार्हवस्त्राभरणैः भूषितां पर्यङ्के उपविष्टां ददर्श। तां दृष्ट्वा सुरमा विस्मिताभवत्। सा युवती सौजन्येन सुरमां स्वागतम् अकरोत्, किन्तु तस्याः वचनानि सुरमायाः मनसि गाढां शङ्कां जनयन्ति। सुरमा शनैः शनैः ज्ञातवती यत् सा युवती मोतिमा नाम्ना प्रसिद्धा अस्ति तथा गृहे सर्वकार्यानि तस्याः नियन्त्रणे सन्ति। अतः सुरमायाः मनसि अस्वस्थता, विषादः, भयञ्च समकालमेव उत्पद्यन्ते।

तदनन्तरं जीवानन्दः सुरमाम् आहूय महानसं गन्तुम् आदेशं ददाति। सः कथयति यत् परदिने मोतिमा तां गृहस्य सर्वेषु कार्येषु शिक्षयिष्यति। सुरमा मौनभावेन तदाज्ञां स्वीकृतवती। सा स्वजीवनस्य नूतनपरिस्थितिं सम्यग् अवगन्तुम् आरब्धवती।गृहे वसन्ती वृद्धा सेविका सुरमां रहसि अनेकान् पूर्ववृत्तान्तान् कथयति। तस्याः कथनात् सुरमा ज्ञातवती यत् कतिपयवर्षेभ्यः पूर्वं जीवानन्दः मोतिमां स्वेन सह तस्मिन् गृहे आनयत्। तदानीं सः तां गृहस्य सर्वकार्यार्थं नियुक्तवान्। कालक्रमेण मोतिमायाः प्रभावः गृहे अतीव वर्धितः। गृहव्यवस्थापनम्, धनव्ययः, सेवकानां नियमनम् इत्यादयः सर्वे विषयाः तस्याः हस्ते एव आसन्। एतत् श्रुत्वा सुरमायाः मनः अत्यन्तं व्यथितम् अभवत्, किन्तु सा किमपि न अवदत्।

एकदा सायंकाले जीवानन्दस्य मोतिमायाश्च मध्ये विवादः अभवत्। मोतिमा स्वस्य पूर्वोपकारान् स्मारयन्ती स्वकीयस्य स्थानस्य स्वीकृतिं याचते। जीवानन्दः तस्याः साहाय्यस्य प्रशंसां करोति, किन्तु सामाजिकमर्यादां प्रति सन्देहं प्रकटयति। विवादानन्तरम् अपि मोतिमा स्वगृहे एव निवसति स्म। एतेषां घटनानां विषये सुरमा मौनमेव धारयति।अनन्तरं सुरमा प्रथमवारं महानसे भोजननिर्माणस्य कार्यं करोति। नूतनपरिस्थितेः

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

कारणात् सा अत्यन्तं चिन्तिता आसीत्। कार्यव्यग्रतया भोजने लवणस्य मात्रा अधिका जाता, ओदने च मृत्तिकायाः कणाः पतिताः। मोतिमा तत् दृष्ट्वा सुरमां कटुवचनैः निन्दितवती। सुरमा स्वपक्षं विनयेन प्रतिपादितवती, किन्तु मोतिमा तस्याः वचनानि नाङ्गीकृतवती।

ततः मोतिमा सर्वं वृत्तान्तं जीवानन्दाय निवेदितवती। जीवानन्दः मोतिमायाः वचनानि श्रुत्वा सुरमामेव दोषिणीं मन्यमानः तां तर्जयामास। सः अवदत् यत् सा मोतिमायाः निर्देशानुसारं सर्वकार्याणि करोतु, अन्यथा स्वपितृगृहं प्रत्यागच्छतु। एतत् श्रुत्वा सुरमा मौनमेव तस्थौ। न सा प्रतिवादं कृतवती, न च कञ्चिद् दोषम् आरोपितवती।

दिनानि एवं शनैः शनैः व्यतीयुः। सुरमा प्रातःकालादारभ्य रात्रिपर्यन्तं सर्वाणि गृहकार्याणि श्रद्धया समापयति स्म। गोदोहनम्, पाककार्यं, गृहशोधनम्, वस्त्रप्रक्षालनम्, सेवकानां सहाय्यम् इत्यादीनि कार्याणि सा निरन्तरं करोति स्म। तस्याः श्रमः, विनयः, सहनशीलता च सर्वेषां दृष्टिगोचरा अभवत्, तथापि सा स्वदुःखं कस्यापि पुरतः न प्रकाशयामास।

एवं कालः शनैः शनैः व्यतीतः। सुरमा प्रतिदिनं प्रातःकालादारभ्य रात्रिपर्यन्तं गृहस्य समस्तकार्याणि निष्ठया सम्पादयति स्म। तस्याः जीवने विश्रान्तेः अवसरः प्रायः नासीत्। तथापि सा कदापि कस्यचित् पुरतः स्वदुःखं न प्रकाशितवती। मोतिमा तां समये समये कटुवचनैः पीडयति स्म, जीवानन्दश्च प्रायः मोतिमायाः वचनमेव सत्यं मन्यमानः सुरमां तर्जयति स्म। एतादृशीषु परिस्थितिष्वपि सुरमा धैर्यं न जहौ।गृहे निवसन्ती वृद्धा सेविका सुरमां सान्त्वयन्ती अवदत् यत् धैर्येण सर्वाणि दुःखानि सोढव्यानि। सा अपि सुरमायाः शीलं, विनयं, सेवाभावं च प्रशशंस। सुरमा तस्याः वचनानि शिरसा स्वीकृत्य स्वकर्तव्ये अधिकमनोनिवेशं कृतवती। सा मन्यते स्म यत् कर्तव्यपालनमेव स्वधर्मः।

एकदा सुरमा स्वजीवनस्य विषये गम्भीरतया चिन्तयन्ती स्वमन्तःकरणे अनेकान् प्रश्नान् अकरोत्। सा चिन्तितवती किं मत्तः अधिकभाग्यहीना काचित् नारी अस्ति, या पतौ जीवति सति अपि तस्य प्रेम्णः स्नेहस्य च अधिकारं न प्राप्नोति? विशालगृहे निवसन्ती अपि सा आत्मानम् एकाकिनीम् अनुभवति स्म। पितृगृहे विमाता, पतिगृहे उपेक्षा, विदेशे अपरिचितजीवनम् एतानि सर्वाणि दुःखानि तस्याः मनसि नित्यं सञ्चरन्ति स्म।

निरक्षरत्वात् सा स्वजनानां प्रति पत्रमपि लिखितुं न अशक्नोत्। स्वकीयदुःखं कस्यचित् निवेदयितुं न मार्गः आसीत्। अतः सा केवलं परमेश्वरं स्मरन्ती प्रार्थयति स्म यथा पृथिवी सर्वभारं वहति तथा अहम् अपि सर्वदुःखानि सोढुं शक्तिं प्राप्नुयाम्। यथा नीलकण्ठः विषं पीत्वापि लोकहिताय स्थितवान्, तथैव अहम् अपि सर्वक्लेशान् सहिष्णुतया धारयेयम्।तस्याः मौनं, संयमः, धैर्यं च दिनप्रतिदिनं दृढतरं जातम्। सा कदापि मोतिमायाः विरुद्धं कटुवचनं न अवदत्, न च जीवानन्दस्य समक्षं कलहं कृतवती। गृहकार्येषु निरता सा सर्वेषां सेवां सम्यगकरोत्। तस्याः स्वभावे विनयः, सरलता, क्षमा, सहिष्णुता च सर्वदा प्रकाशमाना आसन्।

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

कालक्रमेण गृहे सर्वे जनाः सुरमायाः आचारं, व्यवहारं, सेवाभावं च अवलोकयन्तः तस्याः गुणान् ज्ञातवन्तः। सा सर्वेषां प्रति समानभावेन व्यवहरति स्म। दुःखेन क्लिश्यमाना अपि सा स्वकर्तव्याद् कदापि विमुखी नाभवत्। मौनमेव तस्याः बलम् आसीत्, सहिष्णुतैव तस्याः अलङ्कारः।एवं सुरमा स्वजीवनस्य सर्वान् क्लेशान् धैर्येण सोढ्वा कुलस्य मर्यादां रक्षितवती। सा स्वस्य दुःखं हृदये निधाय कर्तव्यपरायणा एव तस्थौ। तस्याः शीलं, त्यागः, विनयः, सहनशीलता च दृष्ट्वा समाजे जनाः तां कुलीना कुलवधूः

आधुनिकसंस्कृतसाहित्ये स्त्रीविमर्शः सामाजिक सांस्कृतिकचिन्तनस्य प्रमुखो विषयः। अस्मिन् विमर्शे स्त्रीणां स्वातन्त्र्यं, आत्मसम्मानः, सामाजिकस्थानं, अधिकारचेतना, व्यक्तित्वविकासश्च विवेच्यन्ते। बीनापाणिपटन्याः कुलीना इति कथा केवलं कुलीनब्राह्मणसमाजस्य यथार्थचित्रणमेव न करोति, अपि तु तस्य समाजस्य अन्तर्निहितां स्त्रीपीडां, स्त्रीजीवनस्य मौनवेदनां तथा तस्याः अस्मितासंघर्षं हृदयस्पर्शिरूपेण प्रस्तौति। कथायाः नायिका सुरमा भारतीयनारीणां प्रतिनिधिस्वरूपा वर्तते। सा बाल्यादारभ्य पराधीनजीवनं यापयन्ती अपि स्वधैर्यं, स्वशीलं, स्वाभिमानं च न परित्यजति। लेखिका कथारम्भ एव समाजस्य विषमतां सूचयति। महेन्द्रस्य गृहागमनसमये सर्वे तस्य वैभवं प्रशंसन्ति, किन्तु तस्य विमातुः दीनावस्थां दृष्ट्वा महेन्द्रपत्नी विस्मयं प्राप्नोति। सा पृच्छति कुत्र भवत्याः प्रकोष्ठः?"ततः विमाता स्वप्रकोष्ठं दर्शयति, यत्र भग्नपर्यङ्कोपरि मलिनानि दुर्गन्धीनि जीर्णानि चाच्छादनकानि विकीर्णानि आसन् [1]। एषः प्रसङ्गः केवलं गृहवर्णनं न, अपितु कुलीनसमाजे वृद्धस्त्रियाः उपेक्षितजीवनस्य दारुणचित्रम्। लेखिका सूचयति यत् कुलीनता केवलं सामाजिकप्रतिष्ठायाः नाम, न तु स्त्रीसम्मानस्य प्रतीकः। एषा सामाजिकभूमिः एव सुरमायाः जीवनस्य पृष्ठभूमिं निर्माति। सुरमायाः विवाहः बाल्ये एव सम्पन्नः चतुर्वर्षपूर्वं जीवानन्देन सह परिणीतासीत् सुरमा। तदा सा द्वादशवर्षीया, जीवानन्दश्चाष्टादशवर्षीयः आसीत् [2]। एतेन स्पष्टं भवति यत् तस्याः विवाहे स्वेच्छाया न कश्चिदपि विचारः कृतः। विवाहोऽपि तस्याः स्वतन्त्रजीवनस्य प्रारम्भो नाभवत्, यतः विवाहानन्तरं जीवानन्दः व्यापारकार्यार्थं सद्यो दुबईदेशं गतः, सुरमा अपि गृहकर्मनिष्पादनार्थं विमात्रा पितृगृहे आहूता [3]। अत्र लेखिका बालविवाहस्य दुष्परिणामं तथा स्त्रियाः पराधीनजीवनं सूक्ष्मतया प्रकाशयति। विवाहिता अपि सुरमा स्वजीवनविषये निर्णयं कर्तुं न समर्था, सा केवलं पितुः, विमातुः, पत्युः च निर्णयानामनुगामिनी भवति। तथापि एषा पराधीनता तस्याः आत्मबलं न नाशयति। पर्वतीयप्रदेशे श्रममयं जीवनं यापयन्ती सा निर्झरेषु जलम् आनयन्ती, पशून् चारयन्ती [4]

---

[1]अपराजिता, २२

[2]तत्रैव,

[3]तत्रैव,

[4]तत्रैव,

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

, अपितु स्त्रीजीवनस्य सामाजिकभारस्य प्रतीकः। तस्याः बाल्यं क्रीडासु न व्यतीतम्, अपि तु दायित्वेषु, अभावेषु, उपेक्षायां च व्यतीतम्। एतादृशेष्वपि कष्टेषु सुरमा न कदापि आत्मदैन्यं प्रकाशयति; एषा एव तस्याः स्त्री अस्मितायाः प्रथमाभिव्यक्तिः।

यदा पञ्चवर्षानन्तरं जीवानन्दस्य पत्रं प्राप्य सुरमा पतिगृहं प्रति प्रस्थिता, तदा तस्याः अन्तर्मनसि आशा निराशयोः संघर्षः प्रवर्तते। लेखिका वर्णयति यत् यद्यपि तयोर्विवाहस्य पञ्चवर्षाः व्यतीताः, तथापि पत्या सह तस्याः सहवासः नाभवत् [५]। मार्गे गच्छन्ती सुरमा चिन्तयति किं भविष्यति? किं वा नेति?"[६]। अयं प्रश्नः केवलं भविष्यभयस्य न, अपितु स्वकीयस्य अस्तित्वस्य प्रश्नः। स्त्री नूतनगृहे किं केवलं सेविकेव भविष्यति, उत गृहलक्ष्मीरूपेण सम्मानं प्राप्स्यति एषा चिन्ता तस्याः अन्तःकरणं व्याप्नोति। तथापि सा धैर्यं न त्यजति। सुरमा न विद्रोहिणी, न च आत्मसमर्पिता; अपितु सा संयमेन, धैर्येण, कर्तव्यपालनेन स्वसत्तां प्रतिष्ठापयितुमिच्छति। अत्र लेखिका स्त्री अस्मितां उच्चस्वरेण न, किन्तु मौनशक्तिरूपेण निरूपयति। सुरमायाः चरित्रे सहनशीलता दुर्बलता न, अपितु नैतिकबलस्य परिचायिका। एतादृश्या स्त्रिया समाजस्य अन्यायो निःशब्देनापि प्रश्नीकृतः भवति। अतः कथायाः प्रारम्भिकभागे सुरमा पीडिता नारी इति न केवलं दृश्यते, अपितु आत्मगौरवरक्षणे दृढा, कर्तव्यनिष्ठा, अन्तर्बलसम्पन्ना च नारीरूपेण प्रकाशते। एषैव तस्याः स्त्री अस्मितायाः प्रथमसोपानम्, यत् परवर्तिषु घटनासु अधिकं विकसितरूपेण दृश्यते।

विदेशस्थितगृहे सुरमायाः प्रवेशेन कथायाः वास्तविकः संघर्षः प्रारभ्यते। यत् गृहम् सा स्वप्नेषु प्रेम, स्नेह, सम्मानस्य च केन्द्ररूपेण चिन्तितवती, तत् तस्याः कृते दुःखस्य, उपेक्षायाः, अपमानस्य च क्षेत्रं भवति। गृहप्रवेशमात्रेण सा एकां सुशोभितां तरुणीं पर्यङ्कोपरि उपविष्टां पश्यति। सा मोतिमा नाम्नी युवती। सुरमा प्रारम्भे तां गृहस्वामिन्येव मन्यते, परन्तु शनैः शनैः ज्ञायते यत् सा जीवानन्दस्य पत्नीत्वेन न, किन्तु गृहस्य सम्पूर्णव्यवस्थायाः नियन्त्रकर्त्रीरूपेण तत्र प्रतिष्ठिता अस्ति। गृहे सेवकाः, कार्यव्यवस्था, धनव्ययः, भोजनविभागः, सर्वे विषयाः तस्याः नियन्त्रणाधीनाः सन्ति। एतत् दृष्ट्वा सुरमायाः अन्तःकरणे संशयः, भयम्, असुरक्षाभावश्च समुत्पद्यन्ते।

जीवानन्दस्य व्यवहारोऽपि सुरमायाः प्रति नूतनजीवनस्य प्रथमक्षणादेव कठोरः दृश्यते। सः न तां स्नेहेन स्वागच्छति, न च नववधूयाः मनोभावान् ज्ञातुमिच्छति। अपितु सः केवलम् आदेशं ददाति मोतिमा त्वां सम्पूर्णगृहकर्मविषये बोधयिष्यति। [८]। अत्र लेखिका स्पष्टतया सूचयति यत् पितृसत्तात्मकसमाजे पत्नी स्वातन्त्र्यसम्पन्ना व्यक्तिः न, अपितु गृहकर्मणि नियुक्ता सेविकेव परिगण्यते। विवाहेन सुरमायाः

---

[५]तत्रैव,

[६]तत्रैव,

[८]तत्रैव,

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

सामाजिकपरिचयः परिवर्तितः, किन्तु तस्याः मानवीयगौरवं न वर्धितम्। अस्मिन् प्रसङ्गे स्त्री अस्मिता प्रथमवारं गम्भीरपरीक्षां प्राप्नोति।

अनन्तरं सुरमा मोतिमायाः निर्देशनानुसारं गृहकार्याणि शिक्षते। प्रतिदिनं प्रातःकालादारभ्य रात्रिपर्यन्तं सा गोदोहनम्, पाककार्यं, गृहमार्जनम्, वस्त्रप्रक्षालनम्, सेवकानां साहाय्यं च निरन्तरं करोति। तथापि तस्याः श्रमस्य, निष्ठायाः, सेवाभावस्य च कस्यापि कृते मूल्यं नास्ति। नवपरिस्थितेः कारणात् प्रथमवारं भोजनं पचन्त्याः सुरमायाः हस्तात् स्वल्पा त्रुटिः जायते। व्यञ्जने लवणस्य मात्रा अधिका भवति, ओदने च मृत्तिकायाः कणाः पतन्ति। मोतिमा तस्याः दोषं क्षन्तुं न इच्छति, अपितु सेवकानां समक्षं कटुवचनैः तां निन्दति। सा वदति भोजनरन्धने नास्ति कीदृशं कौशलम्। [८]। अयं प्रसङ्गः केवलं भोजनदोषस्य वर्णनं न, अपितु स्त्रियाः आत्मसम्मानभङ्गस्य मार्मिकं चित्रम्।

सुरमा विनयपूर्वकं स्वदोषं स्वीकुर्वन्ती परिस्थितिं स्पष्टयितुमिच्छति, किन्तु मोतिमा तस्याः किमपि वचनं न शृणोति। ततः सर्वं वृत्तान्तं जीवानन्दस्य पुरतः निवेदयति। दुःखस्य विषयः अयं यत् जीवानन्दः सत्यासत्ययोः विचारं न करोति। सः स्वपत्नीं न पृच्छति, न च तस्याः पक्षं ज्ञातुमिच्छति; अपितु मोतिमायाः वचनमेव प्रमाणं मन्यते। सः क्रुद्धः सुरमाम् उद्दिश्य वदति यदि अत्र वसन्तुं वाञ्छसि तर्हि मोतिमायाः शासनं निर्वह; अन्यथा शीघ्रं स्वमातृकुलं प्रत्यागच्छ। [९]। एषा वाणी न केवलं पत्युः कठोरता, अपितु स्त्रीणां व्यक्तित्वस्य अवमूल्यनस्य सामाजिकदृष्टान्तः।

एतादृशे अपमानेऽपि सुरमा स्वसंयमं न जहाति। सा न क्रोधेन प्रत्युत्तरं ददाति, न च कलहम् आरभते। मौनमेव तस्याः प्रतिरोधस्य साधनं भवति। अत्र लेखिका मौनस्य नूतनं स्वरूपं दर्शयति। सुरमायाः मौनं कातरता न, अपितु धैर्यस्य, आत्मसंयमस्य, अन्तर्बलस्य च परिचायकम्। सा जानाति यत् क्षणिकः विवादः समस्यां न समाधानयिष्यति; अतः सा स्वकर्तव्यपालनमेव जीवनस्य मार्गं मन्यते।

गृहे निवसन्ती वृद्धा सेविका सुरमां सान्त्वयति तथा तस्याः शीलं, विनयं, सहिष्णुतां च प्रशंसति। सा कथयति यत् धैर्येण सर्वाणि दुःखानि सोढव्यानि। एतेन लेखिका स्त्रीजीवनस्य अन्यतमं महत्त्वपूर्णं पक्षं प्रकाशयति स्त्रियः परस्परं सहानुभूत्या, सान्त्वनया, मानसिकबलदानेन च एकस्याः दुःखं अन्यया वहन्ति। वृद्धसेविकायाः वचनानि सुरमायाः मनसि आशां जनयन्ति। सा पुनरपि नूतनोत्साहेन स्वकर्तव्येषु प्रवर्तते।

अस्मिन् सम्पूर्णे प्रसङ्गे सुरमा बहिर्दृष्ट्या पीडिता, उपेक्षिता, निरुपायिनी च दृश्यते; किन्तु अन्तःकरणे सा अत्यन्तं दृढा, स्वाभिमानिनी, कर्तव्यपरायणा च वर्तते। तस्याः स्त्री अस्मिता विद्रोहस्य घोषेण न, अपितु मौनधैर्येण, आत्मसंयमेन, नैतिकबलस्य संरक्षणेन च अभिव्यज्यते। बीनापाणिपटन्याः अत्र प्रतिपादयति यत्

---

[८]तत्रैव,

[९]तत्रैव,

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

यथार्थबलं बाह्यकोलाहले न, अपितु अन्तर्निहिते आत्मविश्वासे निहितम्। सुरमा सर्वाण्यपमानानि सहमाना अपि स्वशीलं, स्वाभिमानं, कर्तव्यनिष्ठां च न परित्यजति। अतः कुलीना कथायां अस्य भागस्य माध्यमेन स्त्री अस्मिता दुःखसहनस्य, आत्मगौरवरक्षणस्य, नैतिकदृढतायाश्च उत्कृष्टदृष्टान्तरूपेण प्रकाशिताभवति।

कथायाः उत्तरार्धे सुरमायाः चरित्रे स्त्री अस्मितायाः परिपक्वरूपं द्रष्टुं शक्यते। आरम्भे सा बालविवाहस्य, पितृगृहे उपेक्षायाः, पतिगृहे पराधीनतायाश्च पीडिताभवत्; किन्तु कालक्रमेण तस्याः व्यक्तित्वे अद्भुतं धैर्यं, सहिष्णुता, आत्मबलं च विकसितम्। लेखिका अत्र स्त्रीजीवनस्य यथार्थं केवलं करुणरसस्य माध्यमेन न चित्रयति, अपितु तस्याः अन्तर्निहितां नैतिकशक्तिं, आत्मसम्मानं, जीवनदृष्टिं च प्रभावकरूपेण प्रकाशयति। सुरमा सर्वाणि दुःखानि मौनेन सहते, किन्तु तस्याः मौनं कदापि दुर्बलतायाः परिचायकं न भवति। तत् स्वाभिमानस्य, संयमस्य, चरित्रबलस्य च प्रतीकं भवति।

मोतिमायाः कठोरव्यवहारः, जीवानन्दस्य उपेक्षा, सेवकानां समक्षं पुनःपुनरपमानं च सुरमायाः जीवनस्य दैनन्दिनवास्तविकतामेव निर्माति। तथापि सा न प्रतिशोधभावेन प्रेर्यते, न च स्वकर्तव्याद् विमुखी भवति। प्रतिदिनं प्रातःकालादारभ्य रात्रिपर्यन्तं सा गृहस्य सर्वकार्याणि निष्ठया सम्पादयति। गोदोहनम्, पाककार्यं, गृहमार्जनम्, वस्त्रप्रक्षालनम्, सेवकानां साहाय्यं, गृहव्यवस्थापनं च सा अनवरतं करोति। तस्याः परिश्रमः सर्वैः दृश्यते, किन्तु प्रशंसा न कस्यापि मुखात् निर्गच्छति। अत्र लेखिका दर्शयति यत् समाजे स्त्रीणां श्रमः बहुधा स्वाभाविककर्तव्यरूपेण स्वीक्रियते, न तु तस्य मूल्यं समुचितरूपेण ज्ञायते। एषा सामाजिकवृत्तिः स्त्री अस्मितायाः प्रमुखविघ्नेषु अन्यतमा वर्तते।

सुरमा निरक्षरत्वात् स्वजनानां प्रति पत्रमपि लिखितुं न समर्था। पितृगृहे स्वदुःखं निवेदयितुं न मार्गः, पतिगृहे तस्याः वचनं न कोऽपि शृणोति। तस्याः जीवनं पूर्णतया एकाकित्वेन परिव्याप्तम्। लेखिका तस्याः मानसिकवेदनां मार्मिकतया निरूपयति। सुरमा चिन्तयति यत् पतिः सन्निहितोऽपि प्रेम नास्ति, परिवारः सन्निहितोऽपि आत्मीयता नास्ति, विशालगृहं विद्यते, किन्तु तत्र स्वत्वस्य किञ्चिदपि स्थानं नास्ति। एषा अनुभूतिः आधुनिकस्त्रीजीवनस्यापि सार्वकालिकसमस्या इति प्रतीतिः भवति। स्त्री केवलं शरीरेण न, अपितु भावनाभिः, सम्मानाभिलाषया, आत्मीयतया च जीवति; यदा एतानि सर्वाणि तस्मात् अपह्रियन्ते, तदा तस्याः अस्तित्वमेव संकटे पतति।

एतादृशे विषमे समये सुरमा ईश्वरमेव शरणं गच्छति। सा प्रार्थयति यथा पृथिवी सर्वभारं वहति तथा अहम् अपि सर्वदुःखानि सोढुं शक्तिं प्राप्नुयाम्। यथा नीलकण्ठः विषं पीत्वापि लोकहिताय स्थितवान् तथैवाहमपि सर्वक्लेशान् सहिष्णुतया धारयेयम्। [+]। एषा प्रार्थना तस्याः आध्यात्मिकबलस्य परिचायिका। अत्र स्त्री अस्मिता धर्माधारितधैर्येण समन्विता दृश्यते। सा पराभवं न स्वीकरोति, अपितु आत्मबलवृद्ध्यर्थं

[+]तत्रैव,

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

परमेश्वरस्य साहाय्यम् इच्छति। अस्याः प्रार्थनायाः माध्यमेन लेखिका सूचयति यत् सहिष्णुता दैन्यता न, अपितु आत्मनियन्त्रणस्य श्रेष्ठरूपम्।

वृद्धा सेविका अपि सुरमायाः जीवने महत्त्वपूर्णां भूमिकां निर्वहति। सा समये समये सुरमां सान्त्वयति, धैर्यस्य महत्त्वं बोधयति, तस्याः शीलं, विनयं, सेवाभावं च प्रशंसति। अत्र लेखिका स्त्रीणां पारस्परिकसहानुभूतेः महत्त्वं प्रतिपादयति। पुरुषप्रधानव्यवस्थायां यत्र स्त्रियः बहुधा उपेक्षिताः भवन्ति, तत्र अन्याः स्त्रिय एव परस्परस्य मानसिकबलस्य आधाराः भवन्ति। एषा सहानुभूतिः स्त्री अस्मितायाः संरक्षणे महत्त्वपूर्णं साधनं भवति।

कालक्रमेण सुरमायाः सदाचारः, सहिष्णुता, निःस्वार्थसेवा च सर्वेषां दृष्टिगोचराः भवन्ति। यद्यपि मोतिमा तां निरन्तरमवमन्यते, जीवानन्दोऽपि तस्याः मूल्यं न ज्ञाति, तथापि अन्ये जनाः शनैः शनैः तस्याः गुणान् अवगच्छन्ति। सुरमा कदापि मोतिमायाः प्रति द्वेषं न वहति, न च प्रतिशोधभावेन प्रेर्यते। तस्याः चरित्रे क्षमा, दया, विनयः, सहिष्णुता च निरन्तरं प्रकाशन्ते। एते गुणाः तस्याः स्त्री अस्मितायाः वास्तविकाधाराः भवन्ति। लेखिका अत्र स्पष्टयति यत् स्त्रीणां महत्ता केवलं बाह्यस्वातन्त्र्ये न, अपितु आन्तरिकमूल्येषु अपि निहिता अस्ति।

कथायाः अन्तिमभागे जीवानन्दस्य जातिबान्धवाः सुरमायाः चरित्रं दृष्ट्वा विस्मयं प्राप्नुवन्ति। ते वदन्ति सा कुलीना कुलवधूः; यया सर्वे दुःखजाताः निपीयापि मुखेन न कदापि तदभिव्यक्तम्। [+–]। एषा प्रशंसा केवलं सुरमायाः सहिष्णुतायाः न, अपितु तस्याः चरित्रमहिम्नः सामाजिकस्वीकृतिः। सा कदापि आत्मसम्मानं न परित्यक्तवती, न च स्वशीलात् विचलिता। अतः समाजः अन्ततः तस्याः नैतिकश्रेष्ठतां स्वीकर्तुं बाध्यः भवति।

बीनापाणिपटन्याः कुलीना कथायां स्त्री अस्मिता उच्चस्वरविद्रोहरूपेण न, अपितु मौनप्रतिरोधरूपेण, आत्मसम्मानरक्षणरूपेण, धैर्यस्य, क्षमायाः, कर्तव्यपरायणतायाश्च समन्वितरूपेण प्रकाशिताभवति। सुरमायाः चरित्रेण लेखिका प्रतिपादयति यत् नारी केवलं परिवारस्य सेविका नास्ति; सा संस्कारस्य, सहिष्णुतायाः, नैतिकबलस्य, मानवीयमूल्यानां च अधिष्ठात्री अस्ति। तस्याः जीवनसंघर्षः समाजस्य अन्यायपूर्णरीतीनां प्रति निःशब्दः किन्तु प्रभावी प्रतिवादः भवति। अतः कुलीना कथायाः माध्यमेन लेखिका स्त्रीजीवनस्य दुःखमात्रं न वर्णयति, अपितु तस्याः अन्तर्निहितां गौरवपूर्णामस्मितां, आत्मविश्वासं, अविचलचरित्रबलं च चिरस्मरणीयतया प्रतिष्ठापयति।अतः*कुलीना*कथा केवलं कुलीनब्राह्मणसमाजस्य सामाजिकदोषान् न उद्घाटयति अपितु भारतीयस्त्रीणां मौनसंघर्षस्य आत्मगौरवस्य नैतिकबलस्य च

[+–]पृ ३४

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University

कालजयी रचनारूपेण प्रतिष्ठां प्राप्नोति। वीणापाणिपाटन्याः दृष्टौ स्त्री अस्मिता बाह्यविद्रोहे न अपितु आत्मविश्वासे कर्तव्यपरायणतायां मानवीयमूल्येषु च निहिता अस्ति।

सन्दर्भग्रन्थ

(—) पाटनी वीणापाणि। अपराजिता। दिल्ली नाग प्रकाशक १९९४

Volume 5, Issue 2, 2026, p 9-18, ISSN 2583-6331
©Indira Gandhi National Open University